# पाणिनीयव्याकरणे गुरुपरम्परा

सायनदासः*

## भूमिका

प्रवाहमानायां संस्कृतपरम्परायां संस्कृतव्याकरणस्य चर्चा बहुप्राचीना वर्तते। तत्र “अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्” इति या उक्तिः भर्तृहरिणा कृता तया ज्ञायते यद् ब्रह्मात्मकस्य शब्दतत्त्वस्य उत्पत्तिः विनाशो वा नास्ति। यद्यपि नित्यब्रह्मात्मकशब्दराशीनां व्युत्पत्तिः व्याकरणेन क्रियते तथापि इयम् “असत्ये वर्त्मनि स्थित्वा ततः सत्यं समिहते” इति वचनानुरोधादेव। यतो हि वेदस्य नित्यत्वात् तस्य अङ्गस्य मुखरूपव्याकरणस्यापि नित्यत्वमेव विद्यते। अतः व्याकरणस्य मुख्यं कार्यमस्ति प्रकृतिप्रत्यययोः अन्तः विद्यमानस्य ब्रह्मरूपस्याऽर्थस्य प्रकाशनम् इति। प्राचीनाचार्याणां वचनेभ्यः ज्ञायते यद् अयं शिवदत्तस्य व्याकरणस्य आक्षरिकोपदेशः। ततः ब्रह्मा तां विद्यामधिजगे। तस्मात् अन्ये इति परम्पराविषये उच्यते— ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भारद्वाजाय, भारद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः इति। महाभाष्यकारः भगवान् पतञ्जलिः अपि उवाच— बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम इति। इन्द्रस्य व्याकरणाध्ययनविषये वेदेऽपि उक्तं— “वाग् वै पराच्यव्याकृता अवदत्। ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुरु” इति।

ननु यदि अन्तं न प्राप्तवान् तर्हि इयं परम्परा कथमारभ्यते इति प्रश्ने उच्यते— किञ्चित्सामान्यविशेषलक्षणं प्रवर्त्यम् इति, तच्च पाणिनिना आरब्धम् आसीत्

* शोधच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानस्य, बेलुडमठस्य।

*dīpaśikhā*/v11/2026/Sayan Das/pp. 33-35

तस्य अष्टाध्यायी इत्यस्मिन् ग्रन्थे। पुरा कथा असीत् नन्दनृपतेः समयकाले पाटलिपुत्र-नगरे वर्षः इति नामकः कश्चित् गुरुः आसीत्, तस्मात् विद्याधनलाभाय पाणिनिः तस्य वर्षस्य समीपं जगाम। तत्र पाणिनिः सनकादिना सह महेश्वरस्य आराधनां चकार। ततः महेश्वरप्रसादात् स पाणिनिः चतुर्दशसूत्रात्मकं वर्णसमाम्नायं लेभे। तथाहि उच्यते—

**नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।**
**उद्धर्त्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्॥**

पाणिनिः तेन अष्टाध्यायीं विरचयामास। ततः तस्याः अष्टाध्याय्याः उपरि कात्यायनः वार्त्तिकं चकार। वार्त्तिककारस्य पाणिनीयव्याकरणे महत्वपूर्णं स्थानं विद्यते, यथा— सुद्ध्युपास्यः इत्यत्र "संयोगान्तस्य लोपः" इत्यनेन यकारस्य लोपे प्राप्ते वार्त्तिककारेण उक्तं "यणः प्रतिषेधो वाच्यः" इति। तथाहि उक्तम्—

**उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।**
**तं ग्रन्थं वार्त्तिकं प्राहुर्वार्त्तिकज्ञा मनीषिणः॥**

ततः महाभाष्यकारः पतञ्जलिः पाणिनीयाष्टाध्याय्याः किञ्च वार्त्तिकग्रन्थस्य उपरि महाभाष्यं विरचयामास। इदं पञ्चाशीत्याह्निकात्मकं महाभाष्यं पाणिनीयव्याकरणस्य अतिगूढत्वं प्रतिपाद्य भगवतः पतञ्जलेः प्रतिभां तीक्ष्णमनीषां सुकुमारशैलीम् अर्थगूढतां च प्रतिपादयति। महाभाष्ये भगवता पतञ्जलिना पाणिनीयव्याकरणविषये उक्तं "प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्" इति।

भाष्यस्य उपरि कैयटाचर्यः प्रदीपः इति टीकां चकार। तामेव आधारीकृत्य नागेशः नव्यवैयाकरणः प्रदीपोद्यतः इति टीकां विरचितवान्, यत्र भाष्यप्रदीपयोः अर्थः स्फुटतया अवगम्यते। आचार्यभट्टोजिदीक्षितः अपि भाष्यस्य उपरि शब्दकौस्तुभः इति व्याख्यां रचितवान्। प्राचीनवैयाकरणः भर्तृहरिः तस्य

वाक्यपदीयम् इति ग्रन्थम् अपि महाभाष्यमाधारीकृत्यैव अरचयत्।

एवं क्रमेण पाणिनीयव्याकरणस्य परम्परा दृश्यते। शिवस्य आशीर्वादादेव इयं परम्परा आरब्धा आसीत्। तस्मात् परमगुरुः तु शिव एव। ततः पाणिनिः कात्यायनः पतञ्जलिः इति मुनित्रयक्रमः। तत्रोच्यते— "यथोत्तरं मुनीनां प्रामाण्यम्" इति। तेन पूर्वाचार्याणामर्थः उत्तराचार्येण प्रतिपाद्यते। ततः कैयटः स्वटीकाद्वारा भाष्यार्थस्य प्रतिपादनं करोति किञ्च नागेशः तस्य उपरि स्वमतं प्रतिपादयति।